International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 132-135
© 2026 IJMH
www.themultijournal.com
Received: 09-02-2026
Accepted: 23-02-2026
Publish : 24-02-2026

**ड: प्रियङ्का महान्त**
(अतिथि अध्यापिका),
सरकारी डिग्री संस्कृत महाविद्यालय,
वारिपदा, मयूरभञ्ज

**Correspondence:**
**ड: प्रियङ्का महान्त**
(अतिथि अध्यापिका),
सरकारी डिग्री संस्कृत महाविद्यालय,
वारिपदा, मयूरभञ्ज

# वैदिकवाङ्मये मोक्षविमर्शः

**ड: प्रियङ्का महान्त**

**प्रस्तावना-**

दृश्यमाणे विश्वप्रपञ्चेऽस्मिन् स्वस्वरूपप्रतिष्ठायै सर्वेषां दर्शनानां वेदोपनिषदां महत्त्वं राराजते। तत्र श्रुतिषु ज्ञानसाधनममृतत्वाय कल्पते इति प्रदर्शितम्। महाभारते वीतरागभयलोभमोहमनुष्यः साधनद्वारा मोक्षं लभते इति निगदितम्। भगवद्गीतायां स्थितप्रज्ञमनुष्य अद्वैतमात्मतत्वं लब्ध्वा अमृतमयं मोक्षमाश्रयते। पुराणादिषु भगवद्भक्त्या परानुरक्त्या च मोक्षाय प्रवर्त्तते। नैयायिक-वैशेषिकसिद्धान्ते प्रमाणादि षोडशपदार्थानां तत्त्वज्ञानादेव मुक्तिः सिध्यति। नित्यनैमित्तिककर्मणा मुक्तिः संपद्यते। तथा च सांख्यदर्शने पञ्चविंशतितत्वविज्ञानादपवर्गः जायते। योगे चित्तवृत्तिनिरोधादेव स्वरूपावस्थानं मुक्तिः वा लभ्यते इति।

**कूटशब्दाः-** तपः, भक्तिः, ईश्वरः, मोक्षः ।

**उपक्रमः-**

करालकालकुटिले त्रितापजर्जरिते जगतितले मनुष्यस्य शान्तिनिदानं सर्ववेदान्तवेद्यं मुक्तितत्त्वमुचैस्तमां चकास्ति इति। वैदिककालादारभ्य मानवसभ्यतायाः विकाशात् परम् आत्मानुसन्धा-नधारया निरन्तरं सुखलिप्सया मनुष्यः विश्वप्रपञ्चे अहर्निशं दुःखजालैः सम्पीडिताः सन्त आध्यात्मिक-विकाशाय यततेतराम्। प्रारब्धवशात् जन्मान्तरकर्मराशिभिः मुह्यमानमानवः देवगुरुप्रसादात् भूमानन्दलाभाय तपोप्रभावेण अमृतमयं मोक्षं लभते। ज्ञानपथे अद्वैत ब्रह्मचेतना लाभ, योगे स्वस्वरूपप्रतिष्ठा तथा भक्तिमार्गे भगवद्साक्षात्कार एव मुक्तिरूपेण विद्वद्भिः विशदीकृतः।

**श्रुतिषुप्रतिपादितमोक्षतत्त्वानि-**

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादि श्रुतिवलाच्छ्रवणमनननिदिध्यासनादि दर्शनक्रमेण मोक्षसाधनानि सन्ति। यथाहि बृहदारण्यकोपनिषदि-

**श्रोतव्यः श्रुतिवाक्येभ्योमन्तव्यश्चपोपत्तिभिः।**
**मत्वा च सततं ध्येयं इति दर्शन हेतवः।। 1।।**

एवं च गीतायाम्- "वेदैश्च सर्वैरहमेव वेद्यः" इति ध्यानरूपस्य योगस्य मुक्तिसाधनत्वे "ते ध्यान योगानुगताः"। पृथिव्यप्तेजोऽनिलखे समुत्थिते ।।

**"स्वदेहमरणिं कृत्वा प्रणवं, चोत्तरारणिम्**
**ध्याननिर्मथनाभ्यासात् तं देवं द्रष्टुर्महति ।।"**

श्वेताश्वेतरादिश्रुतयः प्रमाणम्, तथापि ध्यानस्य ज्ञानसाधनत्वमेव, मुख्यं मुक्तिसाधनत्वं तु ज्ञानस्यैव। तथा हि- "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाय" विद्वान् नामरूपाद् विमुक्तः "तरति शोकमात्मवित्" आत्मानं चेद् विजानीयादयमस्मीति पुरुषः "इत्याद्याः श्रुतयः अत्रामृतत्वं नामरूपविमुक्तः, शोकस्यैकान्तात्यन्तनिवृत्तिश्च मोक्षः तथा चेतस्य त्रिविधस्याप्यभावस्याधिष्ठानात्म-कत्वात् सच्चिदानन्दात्मरूप एव मोक्षः। इनि पुरुषार्थः ।

महर्षि दयानन्दस्य कृते एतस्य केवलं तात्पर्यमस्ति यत् ते मुक्तौ न जीवन्ति यतः अन्याः प्राणाः प्रायः पुनः पुनः जन्ममृत्युभिः बद्धाः भवन्ति। मुक्तिकालादनन्तरं ते पुनः जगति आगच्छन्ति। अतो हि ऋग्वेदे- अग्नेर्वयं प्रथमस्यामृतानां मन्महे चारु देवस्य नाम।

**स नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च।। 2।।**

अस्य मन्त्रस्य भावार्थः - वयं सर्वे देवानामग्रगण्यस्य अग्नेः मंगलमयं नाम स्मरामः। स अग्निदेवः अस्मान् पुनः 'अदिति' अखण्डा पृथ्वी अथवा अनन्ता शक्तिं प्रेषयेत्। तस्य कृपया एव वयं पुनः स्वकीयं पितरं मातरं च द्रष्टुं समर्थाः भवेम

**महाभारते प्रतिपादितः मोक्षसन्दर्भः-**

महाभारते उद्योगपर्वणि- "न संदृशो तिष्ठतिरूपमस्य न चक्षुषा पश्यति कश्चिदेनम्। ।।3।।"ये तद्विदुरमृतास्ते भवन्ति" ।।4।। "नान्यः पन्था अयनाय विद्यते" ।। 5 ।।

अत्रापि ज्ञानस्यैव मुक्ति साधनत्वम्। अमृतत्त्वं च मोक्षः। महाभारते शान्तिपर्वणि मोक्षधर्मे सर्वकामत्यागो विक्षेप निवृत्या मनः प्रसादेन ज्ञानोत्पत्तिक्रमेण मोक्षधनम्। ।।6।।

**"यस्य वाङ्मनसी स्यातां सम्यक् प्रणिहिते सदा ।**

**तपस्त्यागश्च सत्यं च स वै परमवाप्नुयात्" ।।7।।**

अत्र वाङ्मनसो समाधानेन तपस्त्यागाभ्यां च सहकृतेन सत्येन मोक्षो दर्शितः। त्यागो नैव चित्तशुद्ध्यादिक्रमेण मोक्षः। तदुक्तम्-

**"नात्यक्त्वा सुखमाप्नोति नात्यक्त्वा विन्दते परम्।**

**ना त्यक्त्वा चाभयः शेते सर्व त्यक्त्वा सुखी भव" ।।8।।**

त्यागादृते सांसारिकं सुखं न प्राप्यते, न च मोक्षपदम्। यदि श्रेष्ठत्वं वाञ्छसि, तर्हि मोहमालस्यं च निश्चितमेव परित्यज्य प्रकृतसुखं लभस्व ।

सर्वकामत्यागः, सर्वामिषत्यागः गृहानारम्भः, भैक्ष्यवृत्तिः एकचरत्वमेतानि समुदितानि दण्डचक्रादिन्यायेन ज्ञानोत्पत्या मोक्षकारणानि ।।9।। वीतरागभयलोभमोहमन्युष्यरजगर वृत्तेन वर्तयन् क्रमेण मुक्ति लभते ।।10।। देहतादात्म्याध्यासात् कर्तृत्व भोक्तृत्वादिरूपो वन्धः। विचारेण तन्निवृत्या च मोक्षः ।।11।। सत्कर्मभिः साध्वी प्रज्ञोदेति, ततो मोक्षः।।12।। निर्वेदादेव परवैराग्यरूपात् क्रमेण कैवल्यम्-

**"निर्वेदादेव कैवल्यं न च किञ्चिद् विचिन्तयेत्।**

**सुखं वै ब्राह्मणो ब्रह्म निर्वेदनाधिगच्छति" ।।13।।**

योगभाष्यकारा अपि- एतस्यैव-हिनान्तरीयकं फलं कैवल्यमित्याहुः। ध्रुवोर्मध्ये चित्तनिरोधेन ज्ञानोत्पत्तिक्रमेण मोक्षः। तदुक्तम्-

**"तत्राह्मपापकर्माणः शुचयोऽत्यन्तनिर्मलाः।**

**लोभमोहपरित्यक्ता मानवा निरूपद्रवाः" ।।14।।**

मार्कण्डेयपुराणस्य एष श्लोकः 'कृतयुगस्य' (सत्ययुगस्य) वर्णनं विदधाति । तस्मिन् काले मानवाः स्वभावत एव धर्मपरायणाः आसन्। तेषां हृदयेषु न कोऽपि लोभः, धनलिप्सा, मोहश्च आसीत्। यतो हि ते पापं नाचरन्ति स्म, अतः तेषां जीवने कोऽपि उपद्रवः, किमपि कष्टं व्याधिर्वा नासीत्। सर्वे जनाः सात्त्विकगुणपूर्णाः, शुद्धाश्च अभूवन् ।

व्याख्यातं च श्रीनीलकण्ठेन अपापकर्मत्वादिगुण चतुष्टयवन्तोमानवा स्तत्रगताः सन्तो निरूपद्रवा भवन्तीति योजना तथा च श्रुतिः- "तं वा एतं सेतुं तीर्वाऽन्धः सन्ननन्धो भवत्युपतापी सन्ननुप्रतापी भवति" इति। ध्यानयोगरूपेण धर्मेणैव कैवल्यमिति तदुक्तम्-

**"धर्मोयोनिर्मनुष्याणां देवनाममृतं दिवि।**

**प्रेत्यभावे सुखं धर्माच्छश्वत् तैरूपभुज्यते" ।। 15 ।।**

हृदाकाशाख्ये ब्रह्मलोके, अमृतम्- कैवल्यकारणं धर्म एव। उत्तरार्धेन तु मनुष्याणां प्रत्यभावे धर्मफलमुच्यते इति श्रीनीलकण्ठः। स्वभावेस्वरूपे, सुक्तियोंगस्तया देहतादात्म्याध्यासकृतां पररूपतां परित्यज्य स्वरूपास्थित्या युक्तश्च स विद्वान् नित्यं गुणान् भूतभौतिकान् योगैश्वर्यवलेन सृजते। वितर्काद् विचारं गच्छेद् विचारादानन्दमानन्दादस्मितां ततः कैवल्यमिति योगमार्गोमोक्षप्रापको योगशास्त्रेऽत्र च १९५ अध्यायेऽभिहितः तदुक्तम्-

**"एवमेवेन्द्रियग्रामं शनैः संपरिभावयेत्।**

**संहरेत् क्रमशश्चैवसम्यक् प्रशमिष्यति" ।।16।।**

**पुराणप्रतिपादितमोक्षसाधनानि**

वैदिककालस्य परवर्तिनि समये पुराणानां प्रतिष्ठा जनानां हृदि सन्निविष्टा। पौराणिकी कथा- गाथाधारेण उपाख्यानमनुसृत्य तत्वानां विशदीकरणं हि पुराणानां मौलिकं लक्ष्यम् । अष्टादशपुराणेषु भागवतं महापुराणरूपेण सर्वैः प्रकीर्त्तित्ततम्। सर्वेषां पुराणानां आख्यायिका भिन्नतया प्रतीयमानत्वऽपि लक्ष्यमाभिमुख्यमुद्येश्यं च नितरा-मैक्यभावं प्रतनुते। तत्र विष्णुपुराणे-

**"विस्तारं सर्वभूतस्य विष्णोर्विश्वमिदं जगत्।**

**द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ।।**

**समुत्सृज्यासुरं भावं तस्माद्यूयं तथा वयम्।**

**तथायत्नं करिष्यामो प्राप्स्यामो येन निवृतिम्" ।।17।।**

**"यत्र सर्वं यतः सर्व यः सर्व सर्व संक्षयः।**

**सर्वगत्वादनन्तस्य स एवाहमवस्थितः।**

**मत्तः सर्वमहं सर्वं मयि सर्वं सनातने।**

**अहमेवाक्षयोनित्यः परमात्मात्मसंश्रयः ।।**

**ह्मसंज्ञोऽहमेवाग्रे तथाऽन्ते च परः पुमान्" ।।18।।**

अत्र ज्ञानेन सवासनाऽविद्या निवृत्तिरूपो मोक्षः उक्तः। श्रीमद्भागवत्बते-

**"मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।**

**मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ।।**

**अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे।।**

**सालोक्यसार्ष्टि सामीप्य सारूप्यैकत्वमप्युत ।**

**दीयमानं गृह्णन्ति विनामत्सेवनं जनाः।**

**स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः।**

**येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते" ।। 19 ।।**

अत्रात्यन्तिकेन भक्तियोगेन भगवद्भावापत्तिरूपा मुक्तिः दर्शिता। इत्थं पुराणेषु पञ्चमुक्तयः प्रदर्शिताः। १- सालोक्यम्- भगवता सहैकस्मिन् लोकेवासः।२- साष्टिः- समानैश्वर्यम्

३- सामीप्यम्- निकटवर्त्तित्वम् । ४- सारूप्यम्- समानरूपता ५- सायुज्यम्- एकत्वम् ।

**स्मृतिवर्णितं मोक्षरहस्यम्**

श्रुतिपर्यवेशितस्मृतिशास्त्रेषु दैनन्दिनजीवननिर्वाहव्यापारसहितं मुक्तितत्वर्मापि वहुधा वहुरूपेण सन्निवेशितम्। सत्सु वहुषु स्मृतिशास्त्रेषु मनुस्मृति-याज्ञवल्क्यस्मृति-पराशरस्मृति त्रयं प्रधानं वर्तते।तत्र मनुः-

**"तपो विद्याच विप्रस्य निःश्रेयस्करं परम्।**
**तपसा किल्विषं हन्ति विद्ययाऽमृतमश्नुते" ।।20।।**

"तपः स्वधर्मवृत्तित्वम्" इति भारतदर्शनादाश्रमविहितं कर्म आत्म-ज्ञानं च ब्राह्मणस्य मोक्षसाधनम्। तत्र तपसोऽवान्तर व्यापारमाह- तपसा पापमपहन्ति ब्रह्मज्ञानेन मोक्षमाप्नोति। तथा च श्रुतिः-

**"विद्यां च अविद्यां च यस्तद्वेदोभयं सह ।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।21।।**

विद्यातोऽन्यदविद्या कर्म, मृत्युवद् दुःखसाधनत्वान्मृत्युः पापम्। श्रुत्यर्थ एवायं मनुना व्याख्यानोक्तम्। तथा च तपोविद्याभ्याम-मृतत्वरूपो मोक्षोऽधिगम्यत इति।

**याज्ञवल्क्यश्च-**

**"तत्वस्मृतेरूपस्थानात् सत्वयोगात् परिक्षयात्।**
**कर्मणां संनिकर्षाच्च सतां योगः प्रवर्त्तते।।"**

आत्माख्यतत्वस्मृतेः, आत्मनि निश्चतयोपस्थानात्, शुद्धसत्वयोगात्- केवलसत्वगुण योगात्, कर्म विधानांपरिक्षयात् सत्पुरूषाणांच संव-न्धाद् आत्मयोगः प्रवर्त्तते। तेन च ज्ञान द्वारा मोक्षः।

**नैयायिकवैशेषिकनये मोक्षसाधकतत्त्वम्-**

तत्र मोक्षतत्वसाधनविषये गौतमसूत्रे प्रमाणप्रमेयसंशय प्रयोजन- दृष्टान्त सिद्धान्तावयतर्कनिर्णय वादजल्पवितण्डहेत्वा भासच्छ-लजाति विग्रहस्थानानां तत्वज्ञानान्निश्रेय साधिगमः। दुःखजन्म- प्रवृत्तिदोषमिथ्या ज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ।।22।। इति।

प्रमाणादीनां षोडशपदार्थानां तत्वज्ञानात्तेषु मिथ्याज्ञानापायः। तदपायेतन्मूलकरागद्वेषमोहदोषविनिवृत्तौ तन्मूलकासूयेष्र्यामाया- लोभादीनां च दोषाणामभावः । दोषापाये प्रवृत्यपायः। अत्र प्रकृतिशब्देन प्रवृत्तिसाधौ धर्माधर्मो विवक्षितौ। साध्येसाधनशब्द प्रयोगः "अन्नं प्राणां" इतिवत्। रागद्वैषरहितैरनुष्ठितानि कर्माणि न धर्माधर्मसाधनानि भवन्तीति । सेयं प्रवृत्तिः कुत्सितस्याभिपूजितस्य च जन्मनः कारणमिति प्रवृत्यपाये जन्मापायः। जन्मैव च दुःखकारणम्। जन्मापाये च दुःखापायरूपोमोक्षः। दुःखानि चैकविंशतिः शरीरम्, षडिन्द्रियाणि, षडविषयाः, षड्वुद्धयः, सुखम्, दुःखं चेति। सुखमपिदुःखानुषक्तत्वाद् दुःखमेव। तदुक्तं न्यायवार्तिके "सुखमुपभोक्तुकामेन दुःखमपि भोक्तव्यमेव दुःख वा जिहासता सुखमपि हातव्यमेव, अतएव तस्य पुरूषार्थत्वम्। ज्ञातस्य तु तस्य तज्ज्ञानस्य वा न प्रयोजनत्वम्। दुःखध्वंसं जानीयाम् इतीच्छाऽ ऽप्रवृत्तेः । दुःखानुत्पादरूपो दुःखप्रागभावस्तु न मोक्षः, यतः स्वसमानाधिकरणदुःखा समानकालीं दुःखध्वंसविशिष्टएवासौमोक्ष-रूपोवाच्यः ।

एवमेव प्रशस्तपादभाष्येऽपि ज्ञानपूर्वकात्तुकृतादंस कल्पितफलाद् विशुद्धकुले जातस्य दुःखविगमोपायः जिज्ञासोराचार्यमुपसंगम्यो-त्पन्नषट्पदार्थतत्वज्ञानस्याज्ञाननिवृत्तौविरक्तस्य रागद्वैषाद्यभावा- त्तज्जन्ययो धर्माधर्मयोरनुत्पत्तौ निवृत्तिलक्षणः केवलोधर्मः परमार्थ-दर्शनिजंसुखं कृत्वा निवर्त्तते।

**मीमांसादर्शने मोक्षतत्त्वम्-**

कस्तर्हि मोक्षः ? किञ्च तत्साधनम् ? उच्यते।

**"दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्त्तिनः ।**
**सुखस्य मनसा भुक्ति मुक्तिरूक्ता कुमारिलैः ।।"**

ननु यदि संसारवस्थायामव्यात्मसमवेत एवायमानन्दः, तर्हि कथंनानुभूयते ? अनुभवहेतोरभावादिति ब्रूमः। देहेन्द्रियादीनामा-त्यन्तिकपरिध्वंसानुगृहीनं हि मनस्तदनुभव साधनम् । किं तर्हितादृशानन्दसद्भावे प्रमाणम् ? "आनन्दं ब्रह्मणो रूपं तच्च मोक्षोऽभिव्यज्यते" इति श्रुतिरेव । मोक्षसाधनानि च तत्रैव दर्शितानि-

**"निषिद्धाकाम्यकर्मभ्यः सम्यग् व्यावृत्तचेतसः।**
**नित्यनैमित्तिकप्रायश्चित्तप्रध्वस्तदुष्कृतेः ।।**
**सुखदुःखानिभूतिभ्यां क्षीणप्रारब्धकर्मणः ।**
**युक्तस्य ब्रह्मचर्याद्यैरङ्गैः शमदमादिभिः ।**
**कुर्वाणस्यात्ममीमांसांवेदान्तोक्तेन वर्त्मना।**
**मुक्तिः संपद्यतेसद्योनित्यानन्द प्रकाशिनी।। इति।।"**

**सांख्ययोगयोः मोक्षविमर्शः-**

तत्र सांख्ये प्रकृतिपुरुषयोरनादिरविवेककृतः संयोगवन्धः। तदुक्तम् "तद्योगोप्रऽयाविवेकानन्द समानत्वम्"।।23।। अविवेकोच्छेदश्च प्रकृतिपुरूषान्यतासाक्षात्कारात्। तदुक्तम्-"नियतकारणात्तदुच्छित्ति-ध्वीन्तवत् ।।24।।। अस्य व्याख्यासांख्यप्रवचनभाष्ये-"

शुक्तिरजतादिस्थले लोकसिद्धं यन्तियतं कारणं विवेकसाक्षात्कार-स्तस्मात्तस्या विवेकस्योच्छित्तिर्भवति, ध्वान्तवत्। यथा ध्वान्तमा-लोकादेव नियतकारणान्नश्यति नोपायान्तरेण तथाऽविवेकोऽपि विवेकादेवनश्यति, नतु कर्मादिभ्यः साक्षादित्यर्थः। तदेतदुक्तं योग-सूत्रे-"विवेकख्यातिरविप्लवाहानोपायः"।।25।। इति। कर्मादीनि तु ज्ञानस्यैव साधनानि। एतदप्युक्तं योगसूत्रेण-

"योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः"।।26।। सत्व शुद्धिद्वारा ज्ञान एव योगाङ्गान्तर्गत सर्वकर्मणां साधनत्वावधा-रणादिति। पुरुषस्य वन्धमोक्षौ न वास्तवौ, तयोर्वृद्धि धर्मत्वात्। तथा च सांख्य सूत्रम्- "वाङ्मात्रं न तु तत्वं चित्तस्थितेः" ।।27।। तद्भाष्यम्- "वन्धादीनां सर्वेषां चित्त एवावस्थानात् तत् पुरूषे वाङ्मात्रं सर्वम्स्फटिकालौहित्यवत् प्रतिदिम्वमात्रत्वम्। न तु तत्वम्, तस्य भावः, अनारोपितम्, जपालौहित्यवदित्यर्थः। अतो न श्रुति विरोधः। श्रुतिश्चः-"

**"न निरोधो नचोत्पत्ति र्न वद्धोन च साधकः।**
**न मुमुक्षुर्न वै मुक्त इत्येषापरमार्थता ।।" इति।**

मोक्षश्च सांख्ययोगयोः प्रकृतिपुरूषान्यताख्यात्या प्रकृतेः कृतार्थाया व्यापारोपरम् ऐकान्तकात्यन्तिकदुःखत्रयोपशमरूप इति। "नैकान्ता-त्यन्ततोऽभावात्" इति सांख्यकारिका। "निजमुक्तस्य वन्धध्वंसममात्रं परं न समानत्वम्" ।।28।। इति सांख्य सूत्रम्। परमात्यन्तिकमिति सांख्यप्रवचन भाष्ये। योगसूत्रे मोक्षस्वरूपम्- "पुरूषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति"।।29।।

तत्र पातञ्जल भाष्यम् "कृतभोगापवर्गाणां पुरूषार्थ शून्यानां गुणानां यं प्रतिप्रसवः तत्कैवल्यम्। यं कश्चित् पुरूषं प्रति प्रधानस्य मोक्षः। स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्वानभिसंवन्धात्पुरूषस्य चितिशक्तिरेव केवला। तस्याः सदा तथैवावस्थानं कैवल्यमिति" ।।

**श्रीमद्भगवद्गीतायां मोक्षस्य विवरणम्-**

अष्टादशाध्यायैः मण्डिता श्रीमद्भगवद्गीता अद्वैतामृतं विधत्ते तत्र आदितः प्रथमाध्यायषट्केन निष्काम कर्मयोगः, द्वितीयाध्याषट्केन भक्तियोगस्य, तृतीयाध्याषट्केन ज्ञानयोगस्य विवरणं प्रकटितम्। भगवद्गीतायां प्रतिपादितानि तत्वानि सर्वाणि जीवन विज्ञानस्य अमूल्यरत्नानि इव प्रतिभान्ति। गीतायां वहुत्र ज्ञान- भक्ति- मोक्ष प्रतिपादकाः श्लोकाः समुपपादिताः। तथाहि निष्कामकर्मणा भक्तिर्भक्त्या ज्ञानमिति। भगवद्भावाप्तिश्च मोक्षः-*यः समामेति पाण्डव' मद्भक्त एतत् विज्ञाय मद्भावायोपपद्यते तत एव च विस्तारं ब्रह्म संपद्यते तदा भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् इत्यादिवचनैः "न स भूयोऽभिजायते" इत्यतो देहवन्धनिवृत्ति मोक्षः तोऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः "अनेनामृतत्वं मोक्षः । यानि गुणातीत लक्षणानि तानि मुमुक्षुभिरनुष्ठेयानि साधनानि। जीवन्मुक्तानां यत्नलभ्यानीत्यतो लक्षणानि प्रकाशं च प्रवृत्ति च।" इत्यादिनोक्तानि। अतएव "आपूर्समाणमचलप्रतिष्ठम्" इत्यादीन्यपि तथैव वोध्यानि-

**"सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वां सर्वपापेभ्यः मोक्षयिष्यामि मा शुचः ।।30।।"**

उपर्युक्तपङ्क्तिभिः गीतायां मुक्तिविषयकनिखिलं रहस्यं पर्यालोचितं विद्यते।

**उपसंहारः-**

आत्मानन्द लाभाय भूमानन्द प्राप्तये वा मुक्तितत्वं राजपद्धतिरिव वरीवर्त्तित । तत्र सर्वत्र चतुर्षु वेदेषु उपनिषत्सु, स्मृतिशास्त्रेषु धर्मशास्त्रेषु दर्शनपुराणप्रभृतिषु मुक्तिविषयक -व्याख्यानं वहुधा प्रपञ्चितम्। ऋषीणां वैचित्र्यात् यद्यपि वहुमतानां वैविध्यं दरीदृश्यते तथापि सर्वेषां सिद्धान्तानां लक्ष्यं तु ऐक्यमखण्डतां च विभर्ति। तथाहि श्रीपुष्पदन्तेन शिवमहिम्न स्त्रोत्रे सुस्तुतम्-

**ऋचीनां वैचित्र्यात् ऋजु कुटिलनाना पथजुषाम्।**
**नृणामेकोगम्य स्त्वमसि पयसामर्णव इव ।।31।।**

अत मुक्ति मार्गस्तु जीवस्य साधन रूपः। ईश्वरप्राप्तिः ब्रह्म-साक्षात्कारोवा साध्यरूपः । तत्त्वतः जीवस्य स्वस्वरूपलाभाय नितरामनादिकालात् जिज्ञासा निरवच्छिन्ना तदर्थं प्रारब्धकर्मणां क्षयात् परं संस्कारवलात् मनुष्यः मुक्तिमार्गे आत्मानमभि-निवेशयति।।

**पादटीकाः**

1-वृ-दा- 2-4-5
2- ऋ-वे-1.24.2
3- म-उ- ४६-६
4-म-उ- ४४-३१
5-म-उ- ४४-३६
6-म-शा अ-१७४-१७७
7-म-शा अ-१७५-३४
8- म-शा अ-१७६ - २२
9- मशा अ-१७८
10- म- शा-अ १७९
11- म-शा अ१८०
12- मशा-अ १८१
13-म-शा-189-17
14- मा-पु-अ-49-श्लोकः-14
15-यो- सू-१९३/३३
16- यो- सू- १९५/१९
17-वि-पु- १/१७/८४-८५
18-वि-पु - १/१९/८४-८६
19-वि-पु- उ/२९/२२/२४
20- स्मृ-शा-12-104
21- ई-शा-11
22- सू-१-१-१-२
23-सां- सू- १/५५
24- सां- सू-५६सूं
25- यो- सू-२/२६
26- यो-सू-२/२८
27- सां-सू-१/५८१०
28- सां- सू- १/८६
29-यो- सू-४/३४
30- श्री-भ-गी- १८/६६
31- शि-म-स्तो-श्लोक-7

**ग्रन्थसहायकसूची**


1. पातञ्जलयोगदर्शनम्,चौखम्वाकृष्णदासएकाडेमी, वाराणसी।
2. ए.सि भक्तिवेदान्त स्वामी प्रभुपाद,श्रीमद्भगवद्गीता,भक्तिवेदान्त वुक् ट्रष्ट, मुम्बाई-400049।
3.च्छान्दोग्योपनिषद, गीताप्रेस, गोरखपुर-273005 ।
4.जेना,गजेन्द्रप्रसादः,रूपचन्द्रिका, सांविदीप्रकाशनम्, महोदधि-मार्केट, मोचिसाहि, पुरी।
5.जैन, कुंवर लाल, वैदिकसाहित्येतिहास, भारतीय विद्याप्रकाशन, दिल्ली, वारणासी, प्रथमसंस्करणम्-1997।
6.करः, श्री शरत कुमार , उपनिषदसंग्रह, ओम् प्रकाशन मन्दिर, पुरी-2009 ।
7- श्रीमद्भगवद्गीता- प्रकाशकः- ब्रह्मलीन जयदयाल गोयन्दकागी-ताप्रेस्, गोरखपुर-273005।
8- आचार्य दीक्षितः, राजेशः,शिवमहिम्नस्तोत्र,कमलपुस्तकालय, नई दिल्ली-6 ।
9. पातञ्जलयोगदर्शनम्,चौखम्वाकृष्णदासएकाडेमी, वाराणसी।
10.ऋग्वेदसंहिता, श्रीवेदमाता, गायत्री ट्रष्ट, शान्तिकुञ्ज, हरिद्वार ।